भवति विभाषा । चलोपे[1]–शुक्ला व्रीहयो भवन्ति, भवन्ति, श्वेता गा आज्याय दुहन्ति । भवन्ति इत्येतद [3]विकल्पेन न निहन्यते । वालोपे – व्रीहिभिर्यजेत, यजेत, यवैर्यजेत । एवं [3]शेषेष्वपि यथादर्शनमुदाहार्यम् ॥

## वैवावेति च च्छन्दसि । (६४/३०७१)

वै वाव इत्येताभ्यां युक्ता प्रथमा तिङ[4]विभक्तिः विभाषा नानुदात्ता भवति छन्दसि विषये । 'अहर्वै देवानामासीद् रात्रिरसुराणाम्' (तै सं. १.५.९.२) । 'बृहस्पतिर्वै देवानां पुरोहित आसीच्छण्डामर्कावसुराणाम्' (तै. ६.४.१०.१) । वाव – अयं वाव हस्त आसीत्, नेतर आसीत् ॥

## एकान्याभ्यां समर्थाभ्याम् । (६५/३०७२)

एक अन्य इत्येताभ्यां समर्थाभ्यां [5]युक्ता प्रथमा तिङ[6]विभक्तिः विभाषा नानुदात्ता भवति छन्दसि विषये । [7]'प्रजामेका जिन्वत्यूर्जमेका राष्ट्रमेका रक्षति देवयूनाम्' (अ.वे. ८.९.१३) । जिन्वति इत्येतत्पक्षे न निहन्यते । 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति' (ऋ. १. १६४. २०) । अत्ति इत्येतत्पक्षे न निहन्यते । समर्थाभ्यामिति किम् ? एको देवानुपातिष्ठत् । एक इति सङ्ख्यापदमेतत्, [8]अन्यार्थे न वर्तते । एकशब्दस्य व्यवस्थार्थं च समर्थग्रहणम्, व्यभिचारित्वात् तस्य ॥

## यद्वृत्तान्नित्यम् । (६६/३०७३)

प्रथमा, छन्दसि इति निवृत्तम् । निघातप्रतिषेध [9]इत्येव । यदो वृत्तं यद्वृत्तम् । यत्र पदे यच्छब्दो वर्तते तत्सर्वं यद्वृत्तम्[10] । इह वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात् । डतरडतमौ च प्रत्ययौ इत्येतन्नाश्रीयते । तस्माद् यद्[11]वृत्तादुत्तरं तिङन्तं नानुदात्तं भवति नित्यम् । यो भुङ्क्ते । यं भोजयति । येन भुङ्क्ते । यस्मै ददाति । 'यत्कामास्ते जुहुमः'[12] (ऋ. १०.१२१.१०) । 'यद्रियङ वायुर्वाति' (तै. ५.५.१.१) [13]यद् वायुः पवते । पञ्चमीनिर्देशेऽप्यत्र व्यवहिते कार्यमिष्यते ।

[८९६] याथाकाम्ये वेति वक्तव्यम् । (म. भा. ३.३७९)

यत्र क्वचन यजन्ते ॥

---

1. तावत् इत्यधिकम् ह. 2. पक्षे ब. क. ड. इ. 3. शेषेऽपि ड. 4. विभक्तिः नास्ति ब. 5. युक्ता नास्ति क. इ. 6. विभक्तिः नास्ति क. 7. अजामेकां क. 8. अन्यार्थेन ब. क. ड. 9. एवानुवर्तते ब. क, वायुः पवते (मै.3.4.3), यद् यद् ब, यद्रचङ् वायुः पवते ड. 10. गृह्यते इत्यधिकम् क. 11. वृत्तादनन्तरं इ. 12. तन्नोऽस्तु इत्यधिकम् ह. 13. यदयं